1

# आदर्शपरिवारः
## Ideal Family



एकस्मिन् ग्रामे जगत्पालो नाम एकः सज्जनो वसति। तस्य पत्नी कला अस्ति जगत्पालः सप्तत्रिंशद्वर्षीयः, कला द्वात्रिंशद्वर्षीया च स्तः। तौ दम्पती सुखेन निवसतः।

तयो द्वे सन्तती स्तः, एकस्तनयः एका च तनया। तनयस्य विवेकः तनयायाश्च नाम प्रतिभा अस्ति। विवेकः एकादशवर्षीयः प्रतिभा सप्तवर्षीया च। विवेकः सप्तमकक्षायां पठति। प्रतिभा तृतीयाकक्षायां पठति।

आम्र-निंब मधूकादिवृक्षाणां छायासु स्थितं जगत्पालस्य गृहमत्यन्तं रमणीयं वर्तते। जगत्पालः एकः उद्योगी-कुशलश्च कृषकः। सः सर्वदा कृषि कर्मणि संलग्नः स्वकर्तव्यं पालयति। सः परिश्रमं कृत्वा स्वक्षेत्रे पर्याप्तम् अन्नम्, शाकं, फलं च उत्पादयति। तस्य गृहे एका श्वेतवर्णा धेनुः वर्तते। सा बहु दुग्धं ददाति।

विवेकः प्रतिभा च स्वास्थ्यप्रदं पुष्टिदं च भोजनं कुरुतः। तयोः शाकस्य फलस्य चाधिक्यं वर्तते। तौ यथेच्छं पयः पिबतः। स्वच्छानिवस्त्राणि परिधाय तौ मातरं पितरं च प्रणम्य पठनाय स्वविद्यालयं प्रति गच्छतः।

कला स्वस्था आदर्शभूता च गृहिणी अस्ति। सा सदा स्वकार्याणि सम्पादयति, पत्युः सन्तानयोः स्वास्थ्यविषये सावधाना च वर्तते। पतिः जगत्पालोऽपि स्वपत्नीं कलां बहुमन्यते। अनेनप्रकारेण परस्परं स्नेह-सौहार्द-बद्धः अयं लघुपरिवारः एकः आदर्शपरिवारः अस्ति। लघुपरिवारः एव सुखी परिवारः। आहारस्य वस्त्रस्य गृहस्य च व्यवस्था लघुपरिवारे एव समुचित रूपेण भवति। लघुपरिवारेणैव समाजस्य राष्ट्रस्य च कल्याणं भवितुम् अर्हति।



Scanned with CamScanner

## शब्दार्थाः (Word Meanings)

| | |
|---|---|
| सप्तत्रिंशत् | सैंतीस (Thirty seven) |
| द्वात्रिंशत् | बत्तीस (Thirty two) |
| दम्पती | पति-पत्नी (Husband-wife) |
| निवसतः | रहते हैं (lives) |
| सन्तती | सन्ताने (children) |
| एकादशवर्षीयः | ग्यारह वर्ष (Eleven years old) |
| सप्तवर्षीया | सात वर्ष (Seven years old) |
| परिधाय | पहनकर (Weared) |
| सम्पादयति | सम्पन्न करती है (finished) |
| तनयः | बेटा (son) |
| तनया | बेटी (daughter) |
| रमणीयं | सुन्दर (Beautiful) |
| उद्योगी | मेहनती (Hard working) |
| कृषिकर्मणि | खेती के कार्य (work of field) |
| संलग्नः | लगे हुए (करते हुए) (doing) |
| स्वक्षेत्रे | अपने खेत में (In his field) |
| यथेच्छम् | इच्छानुसार (According to will) |
| पत्युः | पति (Husband) |
| पुष्टिदम् | पौष्टिक तत्वों से युक्त (With protein, vitamin) |
| लघुपरिवारेणैव | छोटे परिवार के द्वारा ही (By small family) |

## अभ्यास कार्यम् (Exercise)

### मौखिकम् (*मौखिक*) (*Oral*)

**उच्चारणं कुरुत (*उच्चारण कीजिए*) (*Pronounce*)**

| | | |
|---|---|---|
| सप्तत्रिंशद्वर्षीयः | सन्तती | स्वास्थ्यप्रदम् |
| द्वात्रिंशद्वर्षीया | दम्पती | अर्हति |
| एकस्तनयः | सप्तवर्षीया | सौहार्द |
| सप्तमकक्षायां | मधूकादि | सम्पादयति |
| एकादशवर्षीयः | तनयायाश्च | बहुमन्यते |

### लिखितम् (*लिखित*) (*Written*)

**1. एकपदेन उत्तरत (*एक पद में उत्तर दीजिए*) (*Answer in one word*)**

(क) जगत्पालः कुत्र वसति?

______________________

(ख) जगत्पालस्य परिवारः कीदृशः?

______________________



Scanned with CamScanner

(ग) कला का अस्ति?

(घ) लघु परिवारः कीदृशः परिवारः अस्ति?

(ङ) जगत्पालस्य तनयः नाम किम् अस्ति?

**2. पूर्णवाक्येन उत्तरत ( पूर्ण वाक्य में उत्तर दीजिए )। (Answer in full sentence)**

(क) जगत्पालः कीदृशः कृषकः अस्ति?

(ख) कला कीदृशी गृहिणी अस्ति?

(ग) विवेकः प्रतिभा च कीदृशं भोजनं कुरुतः?

(घ) जगत्पालस्य गृहे का वर्तते?

(ङ) लघुपरिवारेणैव कस्य कल्याणं भवितुमर्हति?

**3. रिक्तस्थानानि पूरयत। ( रिक्त स्थानों की पूर्ति कीजिए )। (Fill in the blanks)**

(क) विवेकः __________ पठति।

(ख) जगत्पालः सर्वदा __________ संलग्नः स्वकर्तव्यं पालयति।

(ग) जगत्पालस्य पत्नी __________ अस्ति।

(घ) विवेकः प्रतिभा च यथेच्छं __________ पिबतः।

(ङ) लघुपरिवारः एव __________ ।

**4. पदानां विभक्ति वचनं च लिखत ( पदों में विभक्ति व वचन लिखिए ) (Write case and Numbers of the words)**

| पदम् | विभक्तिः | वचनम् |
|---|---|---|
| कृषकः | | |
| स्थानेषु | | |
| तनया | | |
| जगत्पालस्य | | |
| आज्ञया | | |



Scanned with CamScanner

5. **क्रियापदानां लकारः, पुरुषः वचनं च लिखत ( क्रियापदों में लकार, पुरुष, वचन लिखिए ) (Write tense person and Numbers of verbs)**

| क्रियापदम् | लकारः | पुरुषः | वचनम् |
| --- | --- | --- | --- |
| आसीत् | ________ | ________ | ________ |
| अपठत | ________ | ________ | ________ |
| स्तः | ________ | ________ | ________ |
| पालयति | ________ | ________ | ________ |
| भवन्ति | ________ | ________ | ________ |

6. **हिन्दीभाषायाम् अनुवादं कुरुत ( हिन्दी भाषा में अनुवाद कीजिए ) (Translate into Hindi)**

(क) अयं लघुपरिवारः एकः आदर्शपरिवारः अस्ति।
________________________________________

(ख) विवेकः प्रतिभा च स्वास्थ्यप्रदं पुष्टिदं च भोजनं कुरुतः।
________________________________________

(ग) कला एका स्वस्था आदर्शभूता च गृहिणी अस्ति।
________________________________________

(घ) पति जगत्पालोऽपि स्वपत्नीं कलां बहुमन्यते।
________________________________________

(ङ) आहारस्य वस्त्रस्य गृहस्य च व्यवस्था लघुपरिवारे एव समुचित रूपेण भवति।
________________________________________

7. **संस्कृतभाषायाम् अनुवादं कुरुत ( संस्कृत भाषा में अनुवाद कीजिए )। (Translate in to Sanskrit)**

(क) उसकी पत्नी का नाम कला है।
________________________________________

(ख) दोनों दम्पति सुख से निवास करते हैं।
________________________________________

(ग) विवेक ग्यारह वर्ष का और प्रतिभा सात वर्ष की है।
________________________________________

(घ) जगत्पाल एक उद्योगी और कुशल किसान है।
________________________________________

(ङ) उसके घर में एक सफेद रंग की गाय है।
________________________________________




Scanned with CamScanner

# क्रियाकलाप (Activity)

लघु परिवार की विशेषताएँ लिखिए।

चित्र देखकर मञ्जूषा की सहायता से संस्कृत में पाँच वाक्य लिखिए।

परिवारः, स्वास्थ्यप्रदं, सुखी परिवारः, समाजस्य, कृषकः, आकाशे।



(क) ____________________

(ख) ____________________

(ग) ____________________

(घ) ____________________

(ङ) ____________________



Scanned with CamScanner